साधाश्च भल्लातकफलमज्जामलकानि च। जनकानि निगद्यन्ते रेचनानि च रेतसः"। ननु बालानां कथं शुक्रं न दृश्यते इत्यत आह "बालानां शुक्रमस्त्येव किन्तु सौक्ष्म्यान्न दृश्यते। पुष्पाणां मुकुले गन्धो यथा सन्नपि नाप्यते। तेषां तदेव तारुण्ये पुष्टत्वादभिव्यक्तिमेति हि। कुसुमानां प्रफुल्लानां गन्धः प्रादुर्भवेद्यथा। रोमराज्यादयः पुंसां नारीणामपि यौवने। जायतेऽत्र च यो भेदो ज्ञेयो व्याख्यानतः स च"। व्याख्यानं यथा पुंसां रोमोराजीश्मश्रुप्रभृतयः नारीणान्तु रोमराजीस्तनस्तन्यार्त्तवप्रभृतयः। ननु, अन्नरसो वृद्धस्य धातुवृद्धिं कथं न करोतीत्याह "वार्द्धके वर्द्धमानेन वायुना रसशोषणात्। न तथा धातुवृद्धिः स्यात्ततस्तत्रानिलं जयेत्"। अथ शुक्रस्य स्वरूपमाह "शुक्रं सौम्यं सितं स्निग्धं बलपुष्टिकरं स्मृतम्। गर्भवीजं वपुःसारो जीवस्याश्रय उत्तमः"। जीवस्याश्रय उत्तम इत्याह "जीवो वसति सर्वस्मिन् देहे तत्र विशेषतः। वीर्ये रक्ते मले यस्मिन् क्षीणे याति क्षयं क्षणात्"। अथ गर्भसञ्जननशुक्रस्य लक्षणमाह "स्फटिकाभं द्रवं स्निग्धं मधुरं मधुगन्धि च। शुक्रमिच्छन्ति केचित्तु तैलक्षौद्रनिभञ्च तत्"। अथ शुक्रस्य स्थानमाह "यथा पयसि सर्पिस्तु गूढ़श्चेक्षौ रसो यथा। एवं हि सकले काये शुक्रं तिष्ठति देहिनाम्"। अत्र सर्पिर्दृष्टान्तो बहुशुक्रेऽल्पमथनेन सर्पिःशुक्रयोर्लाभात्। इक्षुरसदृष्टान्तस्तु स्वल्पशुक्रे पुंसि अतिपीड़नेनेक्षुरसशुक्रयोर्लाभात्। अथ शुक्रस्य क्षरणमार्गमाह "द्व्यङ्गुले दक्षिणे पार्श्वे वस्तिद्वारस्य चाप्यधः। मूत्रस्रोतपथे शुक्रं पुरुषस्य प्रवर्त्तते"। वृद्धवाग्भटोऽप्याह "सप्तमी शुक्रधरा द्व्यङ्गुले दक्षिणे पार्श्वे वस्तिद्वारस्य चाप्यधोमूत्रमार्गमाश्रिता सकलशरीरव्यापिनी शुक्रं प्रवर्त्तयतीति। सप्तमी कला। अथ शुक्रक्षरणकारणमाह "कृत्स्नदेहस्थितं शुक्रं प्रसन्नमनसस्तथा। स्त्रीषु व्यायच्छतश्चापि हर्षात्तत् सम्प्रवर्त्तते"। स्त्रीषु रतरूपं व्यायामं कुर्वतः। अन्यच्च "शुक्रं कामेन कामिन्या दर्शनात् स्पर्शनादपि। शब्दसंश्रवणात् ध्यानात् संयोगाच्च प्रवर्त्तते"।

दैत्यगुरोः शुक्रनामकारणं काशीख० १७अ०उक्तं यथा "नन्दिनाऽपहृते शुक्रे गिलिते च पिनाकिना" इत्युपक्रमे "तेन शब्देन महता शुक्रः शम्भूदरे स्थितः। छिद्रान्वेषी भ्रमन् सोऽथ विनिर्ब्बीतो यथानिशम्। सप्त लोकान् सपातालान् रुद्रदेहे विलोकयन्। ब्रह्मनारायणेन्द्राणां सादित्याप्सरसां तथा। भुवनानि विचित्राणि युद्धञ्च प्रमथासुरम्। सवर्षाणां शतं कुक्षौ भवस्य पर्य्यटितो भ्रमन्। ततः स ददृशे रन्ध्रं शुचेरन्ध्रं खलो यथा। शाम्भवेनाथ योगेन शुक्ररूपेण भार्गवः। चस्कन्द च सनामापि ततो देवेन भाषितः। जठराग्निर्गते शुक्रे देवोऽपि सुसुदेतराम्। भूयः श्रेयो भवेद् यस्मै न स्थितो जठरे द्विजः। शुक्रवन्निःसृतो यस्मात्तस्मात्त्वं भृगुनन्दन। कर्मणानेन शुक्रोऽपि मम पुत्रोऽसि गम्यताम्"।

शुक्रपहस्वरूपादि वृहज्जातके ग्रहयोन्यध्याये उक्तं दृश्यम्। तत्कक्षादिमानं खगोलशब्दे २४२५पृ०दृश्यम्।

**शुक्रकर** पु०शुक्रं वीर्यं करोति कृ-अच्। मज्जधातौ हेमच० अस्थिकरशब्दे ५५८पृ० दृश्यम्। वीर्यकारके त्रि०।

**शुक्रभुज्** स्त्री शुक्रं भुङ्क्ते भुज-क्विप्। मयूरजातिस्त्रियां शब्दच०। [अस्थिकरशब्दे तद्गुणा दृश्याः।

**शुक्रभू** पु०भवत्यस्मात् भू-अपादाने क्विप्। मज्जधातौ शब्दच०

**शुक्रला** स्त्री शुक्रं लाति ला-क। उच्चटावृक्षे भरतः।

**शुक्रशिष्य** पु० ६त०। दैत्ये असुरे अमरः।

**शुक्रिय** त्रि० शुक्रो देवताऽस्य तस्येदम् वा घ। १शुक्रसम्बन्धिनि २तद्दैवते यजुर्वेदीये "ऋचं वाचमि"त्यादिके षट्त्रिंशत्तमे ३शान्त्यध्याये न०।

**शुक्ल** न० शुच-लक् कुत्वम्। १रजते मेदि०। २नवनीते शब्दच०। ३अक्षिरोगभेदे चक्षूरोगशब्दे २८४४पृ०दृश्यम्। ४श्वेतवर्णे ५श्वेतवर्णयुते त्रि० अमरः। ६शुद्धे च त्रि०। ७विष्कम्भादिषु योगभेदे मेदि०। ८श्वेतैरण्डे राजनि० १०शुक्लपक्षे ज्यो०त०। "तत्र पक्षावुभौ मासे शुक्लकृष्णौ क्रमेण हि। चन्द्रवृद्धिकरः शुक्लः कृष्णश्चन्द्रक्षयात्मकः" षट्त्रिंशन्मतम्। शुक्लवर्णपदार्थास्तु कविकल्पलतायां कतिचित् उक्ता यथा "सुधांशुश्वैःश्रवाः शम्भुः कीर्त्तिर्ज्योत्स्ना शरद्धनाः। प्रासादसौधनगरमन्दारद्रुहिमाद्रयः। सूर्येन्दुकान्तकर्पूरकरम्भा रजतं हली। निर्मोकभस्महिण्डीरचन्दनं करका हिमम्। हारोर्णनाभतन्त्वस्थि स्वर्गङ्गाभरदाम्बकम्। शेषाहिः शर्करा दुग्धं दधि गङ्गा सुधा जलम्। मृणालसिकताहंसवककैरवचामरम्। रम्भागर्भं पुण्डरीकं कैतकीशङ्खनिर्झराः। लोभ्रसिंहध्वजच्छत्रं चूर्णशुक्तिकपर्दिका। मुक्ताकुसुमनक्षत्रदन्तपुण्योशनोगुणाः। कैलासकाशकापालहासनासव-